'बिल्वञ्च पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
क्वाथावलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥'

जलं बाला । बिल्वादिक्वाथावलेहौ अतीसारेषु ॥

'समङ्गाधातकीलोध्रसारिवाभिः शृतं जलम् ।
दुर्द्धरेऽपि शिशोर्देयमतीसारे समाक्षिकम् ॥'

समङ्गा लज्जालुफलम् । समङ्गादिक्वाथो दुर्द्धरेऽतीसारे । * ।

'विडङ्गाजमोदा च पिप्पलीतण्डुलानि च ।
एषामालोड्य चूर्णानि सुखं तप्तेन वारिणा ।
आमे प्रवृत्तेऽतीसारे कुमारं पाययेद्भिषक् ॥'

विडङ्गादिचूर्णमतीसारे । * ।

'मोचरसः समङ्गा च धातकी पद्मकेशरम् ।
पिष्टैरेतैर्यवागूः स्याद्रक्तातीसारनाशिनी ॥'

मोचरसलज्जालुफलधातकीफुलकमलकेशरसमुदिततोला १ तण्डुलकौखुदीतोला १ जलतोला ११ सर्व्वमेकीकृत्य यवागूः साधनीया । मोचरसादियवागू रक्तातिसारे । * ।

'नागरातिविषामुस्ताबालकेन्द्रयवैः शृतम् ।
कुमारं पाययेत् प्रातः सर्व्वातीसारनाशनम् ॥'

नागरादिक्वाथः सर्व्वातीसारे । * ।

'लाजाः सयष्टिमधुका शर्करा क्षौद्रमेव च ।
तण्डुलोदकयोगेन क्षिप्रं हन्ति प्रवाहिकाम् ॥'

लाजादिचूर्णं प्रवाहिकायाम् । * ।

'रजनी सरलो दारुबृहती गजपिप्पली ।
पृश्निपर्णी शताह्वा च लीढ़ं माक्षिकसर्पिषा ॥
दीपनं ग्रहणीं हन्ति मारुतार्त्तिसकामलाम् ।
ज्वरातीसारपाण्डुघ्नं बालानां सर्व्वरोगनुत् ॥'

रजन्यादिचूर्णं ग्रहण्यादौ । * ।

'पौष्करातिविषाशृङ्गीमागधीधन्वयासकैः ।
कृतं चूर्णन्तु सक्षौद्रं शिशूनां पञ्चकासजित् ॥'

पौष्करादिचूर्णं कासेषु । * ।

'पौष्करातिविषावासाकाकशृङ्गीरसं लिहन् ।
मधुना मुच्यते बालः कासैः पञ्चभिरुत्थितैः ॥'

सुस्तकादिरसः कासेषु । * ।

'धात्रीकुसुमसंजातकेशरैरवलेहिका ।
मधुना चिरसंजातान् शिशोः कासान् व्यपोहति ॥'

कासे । * ।

'धान्यं शर्करया युक्तं तण्डुलोदकसंयुतम् ।
पानमेतत् प्रदातव्यं कासश्वासापहं शिशोः ॥'

धान्यादिपानं कासश्वासयोः । * ।

'द्राक्षावासाभयाकृष्णाचूर्णं क्षौद्रेण सर्पिषा ।
लीढ़ं श्वासं निहन्त्याशु कासञ्च तमकं तथा ॥'

तमकं श्वासभेदम् । द्राक्षादिचूर्णं कासश्वासयोः ।

'चूर्णं कटुकरोहिण्या मधुना सह योजयेत् ।
हिक्कां प्रशमयेत् क्षिप्रं छर्द्दिञ्चापि चिरोत्थिताम् ॥'

हिक्कायां छर्द्द्याञ्च । * ।

'आम्रास्थिलाजसिन्धूत्थं सक्षौद्रं छर्द्दिनुद्भवेत् ॥'

छर्द्द्याम् । * ।

'पीतं पीतं वमेद्यस्तु स्तन्यं तं मधुसर्पिषा ।
द्विवार्त्ताकीफलरसं पञ्चकोलञ्च लेहयेत् ॥'

द्विवार्त्ताकी बृहतीद्वयम् । * ।

'पञ्चकोलानि पिप्पलीपिप्पली-
मूलचव्यचित्रकनागराणि ॥'

क्षीरच्छर्द्याम् । * ।

'ह्रीवेरशर्कराक्षौद्रं लीढ़ं तृष्णाहरं परम् ।
घृतेन सिन्धुविश्वैलाहिङ्गुभार्गीरजो लिहन् ।
आनाहं वातिकं शूलं हन्यात्तोयेन वा शिशुः ॥'

आनाहे वातशूले च । * ।

'कणोषणासिताक्षौद्रसूक्ष्मैलासैन्धवैः कृतः ।
मूत्रग्रहे प्रयोक्तव्यः शिशूनां लेह उत्तमः ॥'

मूत्राघाते । * ।

'यदा तु दुर्ब्बलो बालः खादन्नपि च वह्निमान् ।
विदारीकन्दगोधूमयवचूर्णं घृतप्लुतम् ।
खादयेत्तदनु क्षीरं शृतं समधुशर्करम् ॥'

कार्श्ये । * ।

'सुस्तकुष्माण्डबीजानि भद्रदारुकलिङ्गकान् ।
पिष्ट्वा तोयेन संलिम्पेल्लेपोऽयं शोथहृच्छिशोः ॥'

शोथे । * ।

'पटोलत्रिफलारिष्टहरिद्राक्वथितं पिबेत् ।
चतवीसर्पविस्फोटज्वराणां शान्तये शिशुः ॥'

चतवीसर्पविस्फोटज्वरेषु । * ।

'गृहधूमनिशाकुष्ठराजिकेन्द्रयवैः शिशोः ।
लेपस्तक्रेण हन्त्याशु सिध्मपामविचर्च्चिकाम् ॥
सारिवातिललोध्राणां कषायो मधुकस्य च ।
संस्राविणि मुखे शस्तो धावनार्थं शिशोः सदा ॥'

मुखस्रावे । * ।

'अश्वत्थत्वग्दलक्षौद्रैर्मुखपाके प्रलेपनम् ॥'

मुखपाके । * ।

'पिप्पलीत्रिफलाचूर्णं घृतक्षौद्रपरिप्लुतम् ।
बालो रोदिति यस्तस्मै लेढुं दद्यात् सुखावहम् ॥'

रोदने । * ।

'हरीतकी वचा कुष्ठं कल्कं माक्षिकसंयुतम् ।
पीत्वा कुमारः स्तन्येन मुच्यते तालुकण्टकात् ॥'

तालुकण्टके । * ।

'फलत्रिकं लोध्रपुनर्नवे च
शृङ्गबेरं बृहतीद्वयञ्च ।
आलेपनं शोथहरं सुखोष्णं
कुकूणके कार्य्यमुदाहरन्ति ॥'

कुकूणके । * ।

'मृत्पिण्डेनाग्नितप्तेन क्षीरसिक्तेन सोष्मणा ।
स्वेदयेदुत्थितां नाभिं शोथस्तेनोपशाम्यति ॥'

नाभिशोथे । * ।

'नाभिपाके निशालोध्रप्रियङ्गुमधुकैः शृतम् ।
तैलमभ्यञ्जने शस्तमेभिर्वाप्यवधूलनम् ॥
दग्धेन छागशकृता नाभिपाकेऽवचूर्णनम् ।
त्वक्चूर्णैः क्षीरिणां वापि कुर्य्याच्चन्दनरेणुना ॥'

नाभिपाके । * ।

'गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम् ।
रसाञ्जनं विशेषेण पानलेपनयोर्हितम् ॥
शङ्खयष्ट्याञ्जनैश्चूर्णं शिशूनां गुदपाकनुत् ॥'

अञ्जनं रसाञ्जनम् । गुदपाके । * ।

'शङ्खसौवीरयष्ट्याह्वैर्लेपो देयोऽहिपूतने ॥'

अहिपूतने । * ।

'पारिगर्भिकरोगे तु पूज्यते वह्निदीपनम् ॥'

पारिगर्भिके । * ।

'दन्तपालिन्तु मधुना चूर्णेन प्रतिसारयेत् ।
धातकीपुष्पपिप्पल्योर्धात्रीफलरसेन वा ॥
दन्तोत्थानभवा रोगाः पीड़यन्ति न बालकम् ।
जाते दन्ते हि शाम्यन्ति यतस्तद्धेतुका गदाः ॥'

दन्तोद्भेदजरोगेषु । * ।

'सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतं वचा ।
मत्स्याक्षकः शङ्खपुष्पी मधु सर्पिः सकाञ्चनम् ॥
अर्कपुष्पीमधु घृतं चूर्णितं कनकं वचा ।
सहेमचूर्णं कैटर्य्यं श्वेता दूर्व्वा घृतं मधु ॥
चत्वारोऽभिहिताः प्राशा अर्द्धश्लोकसमापनाः ।
कुमाराणां वपुर्मेधाबलपुष्टिकराः स्मृताः ॥'

सौवर्णचूर्णम् । चतुर्ष्वपि योगेषु मारितसुवर्णचूर्णम् । मत्स्याक्षकः माक्षी इति लोके वकम इत्येके । अर्कपुष्पी अर्कसदृशपुष्पलता । कैटर्य्यं कट्फलम् । श्वेता दूर्व्वाविशेषः वचेति केचित् । संवत्सरं यावदेते योगाः प्रयोज्याः द्वादशवर्षाणीति केचित् । * ।

'बालानाञ्च वपुर्मेधाबलपुष्टिकराः स्मृताः ।
लाक्षारसे समे तैलं मस्तुन्यथ चतुर्गुणे ॥
रास्नाचन्दनकुष्ठाब्दवाजिगन्धानिशायुतैः ।
शताह्वादारुयष्ट्याह्वमूर्व्वातिक्ताहरेणुभिः ॥
संसिद्धं ज्वररक्षोघ्नं बलवर्णकरं शिशोः ॥”

लाक्षादितैलं बालेषु । * । इति भावप्रकाशे बालरोगाधिकारः ॥

बालवायजं क्ली, ( बालवाये वैदुर्य्यप्रभवे देशविशेषे जायते इति । जन्+ड । ) वैदूर्य्यम् । इति त्रिकाण्डशेषः ॥ ( विवृतिर्विशेषश्चास्य वैदूर्य्यशब्दे ज्ञेयः ॥ )

बालवासः [ स् ] क्ली, ( बालानां लोम्नां जालै-र्निर्म्मितं वा वासः । ) केशनिर्म्मितवस्त्रम् । बालकस्य वस्त्रञ्च । इति केचित् ।

बालवाह्यः पुं, ( बालाः शिशवो वाह्या यस्य । एते खलु कस्मिंश्चिदुपस्थिते भये शिशून् पृष्ठे निधाय पलायन्त इति प्रसिद्धेस्तथात्वम् । ) वनच्छागः । इति हारावली । ८१ ॥ बालकवहनीये त्रि ॥

बालव्यजनं, क्ली, ( बालस्य चमरीपुच्छस्य बालेन वा निर्म्मितं व्यजनम् ।) चामरम् । तत्पर्य्यायः । रोमगुच्छः २ प्रकीर्णकम् ३ । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । १३ ।

“लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति बालव्यजनैश्चमर्य्यः ॥”)